International Journal of Sanskrit Research 2020; 6(6): 90-91

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(6): 90-91
© 2020 IJSR
www.anantaajournal.com
Received: 17-11-2020
Accepted: 23-12-2020

**डॉ0 दीप लता**
सहायक आचार्य, संस्कृत विभाग
हिमाचल प्रदेश विश्वविद्यालय,
हिमाचल प्रदेश, भारत

**Corresponding Author:**
**डॉ0 दीप लता**
सहायक आचार्य, संस्कृत विभाग
हिमाचल प्रदेश विश्वविद्यालय,
हिमाचल प्रदेश, भारत

# यास्ककृत् निरुक्तानुसारं देवता तत्त्व

## डॉ0 दीप लता

**प्रस्तावना**

यास्कप्रणीतस्य निरुक्तस्य सप्तमोऽध्याय दैवतकाण्डनाम्ना ज्ञायते। अस्य दैवतकाण्डस्य द्वितीये पादे आचार्य यास्कः कथयति यत्– ''तिस्रः एव देवताःइति नैरुक्ताः।''[1] अर्थात् निरुक्तानुसारं तिस्रः एव देवता सन्ति।

तिस्रः देवताः इमाः सन्ति– अग्नि, वायु एवं सविता सूर्यो वा एतासां सर्वासाम् देवतानां पृथक् पृथग् ग्रहणं कथं कृतम्? इति जिज्ञासायां निरुक्तकारेण प्रोक्तं यत् ''अग्निः पृथिवीस्थानः वायुर्वेन्द्रो वा अन्तरिक्षस्थानः, सूर्यो द्युस्थानः।'' यतो हि लोका अपि त्रयः सन्ति। पृथिवीलोकः, अन्तरिक्षलोकः, द्युलोकश्च।[2] यद्यपि पौराणिक मान्यतानुसारं एतत् जगत् चतुर्दशभुवनमण्डलात्मकं किन्तु वैदिकमान्यातानुसारं अत्रैव सर्वेषां लोकानां ग्रहणं भवति। अतएव एतेषां सर्वेषां लोकानां नियन्त्रणकर्तारोऽपि देवाः इमे एव त्रयः सन्ति।

एतासां देवतानां महाभाग्यात् एकात्मा बहुधास्तूयते। निरुक्तकारेण उक्तं यथा– ''तासां महाभाग्यात् एकैकस्याः अपि बहूनि नामधेयानि भवन्ति''[3] तासां तिसृणामग्न्यादीनामहाभाग्यात् अर्थात् ऐश्वर्ययोगात्, एकात्मनामनेकधा विकुर्वन्तीनामेकैकस्याः प्रतिविकारं जातवेदाः, वैश्वानरः, वरुणः, रुद्रः, अश्विनौ, उषा इत्येवम् आदीनि, बहूनि नामधेयानि भवन्ति।

तिसृषु देवतासु अग्निदेवस्य प्रथमं स्थानं वर्तते। अग्निदेवस्य अयं लोकः अर्थात् भूलोकः पृथिवीलोक वा। प्रातः सवनम् अग्निदेवस्य कृते भवति। बसन्त ऋतुः, गायत्रीछन्दः, त्रिवृत् स्तोमः रथन्तरं साम अग्निदेवस्य वर्तते। अग्निदेवता प्रथमेस्थाने पठित देवगणस्य प्रतिनिधि वर्तते। अग्नायी इळा पृथिवीमपि अग्न्यान्तर्गतमेव ज्ञातव्यम्। शरद्ऋतुः, अनुष्टुपछनदः एकविंशतिस्तोमः तथा वैराजसाम अपि पृथिवीस्थानीय वर्तन्ते।[4]

अग्निदेवस्य प्रमुखं कर्मं हविषां वहनं देवतानां आह्वाहनं वर्तते। अर्थात् यच्च किंचिद् दार्ष्टिविषयकम्, अग्निकर्म एव तत्। अग्निः अग्रणीः भवति, अग्रं यज्ञेषु प्रणीयते, अंग नयति संनममानः। यज्ञे सर्वप्रथम अग्नेः आह्वानं भवति। यः कोऽपि अग्नेः आश्रयं नयति तं सः आत्मा धीनं करोति। अक्नोपनः भवति–इति स्थौलाष्ठीविः। न क्नोपयति न स्नेहयति। त्रिभ्य आख्यातेभ्यः जायते इति शाकपूणिः। इतात् अक्तात् दग्धात् वा, नीतात्। स खलु एते अकारम् आदत्ते, गकारम् अनक्तेः वा दहतेः वा नी परः।[5] अतः स अग्नि उच्यते। ऋग्वेदे अग्निविषयको मन्त्रो आयाति–

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्।।[6]

अर्थात्– यज्ञस्य क्रियमाण देवताद्याराधनकर्मणः पुरोहितम् पुरोहितत्वाद भीष्ट संपादकम्। यद्वा यज्ञस्यपूर्वभागे आहवनीयरूपेण संस्थितम्। अग्निर्वै देवानां होता इति श्रुतेः। देवं दानादिगुणयुक्तम्।। होतारम् होतृनामकमाह्वातारं वा देवानाम्। ऋत्विजम् देवानामृत्विग्भूतम्। रत्नधातमम् यागफलरूपाणां रत्नानां अतिशयेन धारयितारं पोषयितारं वा। अग्निम् तन्नामकं देवम्। ळे स्तौमि। यद्वा यज्ञस्येति पदं ''देव'' मित्यनेनान्वेति। यज्ञस्यप्रकाशकमित्यर्थः।।

वायुः वा इन्द्र अन्तरिक्षस्थानीय देवता वर्तते। तस्याः देवतायाः अन्तरिक्षलोकः वर्तते। माध्यन्दिनं सवनम्, ग्रीष्मऋतुः, त्रिष्टुप्छन्दः, पंचदशस्तोमः, वृहत्साम आदि इन्द्रदेवस्य कृते वर्तते। तथा च ये च देवगणाः समाम्नाताः, मध्यमे स्थाने याश्च स्त्रियः। अथास्य कर्म– रसानुप्रदानं, वृत्रवध, या च का च बलकृतिः इन्द्रकर्म एव तत्। अथ अस्य संस्तविकाः देवाः– अग्नि, सोमः, वरुणः, पूषा, बृहस्पतिः, ब्राह्मणस्पति, पर्वतः, कुत्सः विष्णुः, वायुः।[7] ऋग्वेदे अन्तरिक्षस्थानीय देवस्य कृते अर्थात् इन्द्रस्य वायोः वा विद्युतः कृते मन्त्रः वर्तते यथा–

अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम्।
घृतस्य धाराः समिधो नसन्त ता जषाणो हर्य्यति जातवेदाः।।[8]

गृत्समदो ब्रूते। जनासः जनाः हे असुराः। यो जात एव जायमान एव सन् प्रथमः देवानां प्रधानभूतः मनस्वान् मनस्विनामग्रगण्यः। देवः द्योतमानः सन् क्रतुना वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा देवान् सर्वान यागदेवान पर्यभूषत् रक्षकत्वेन पर्यग्रहीत्। यो जात एव प्रथमो मनस्वी देवो देवान्क्रतुना कर्मणा पर्यभवत्पर्यगृह्णात्पर्त्यरक्षदत्यक्रामदिति वा। यस्य बलात् द्यावापृथिव्यावप्यविभीतां नृम्णस्य महना बलस्य महत्त्वेन स जनास इन्द्र। यथा–

यो जात एव प्रथमो मनस्वान, देवो देवान्क्रतुना पर्यभूषत्।
यस्य शुष्माद्रोदसी अभ्यसेतां, नृम्णस्य महना स जनास इन्द्रः।।[9]
हेमन्तऋतुः, पंक्तिछन्दः, त्रिणवःस्तोमः, शाक्वरं साम आदि अन्तरिक्षस्थानीयाः वर्तन्ते।[10]

अथ उत अभिधानैः संयुज्य हविश्चोदयति इन्द्राय वृत्रने। इन्द्राय वृत्रघ्ने, इन्द्रायांहोमुचे[11] अथ उत कर्मभिः ऋषिः देवताः स्तौति – वृत्रहा; पुरन्दरः इति तानि अपि एके साममनन्ति, भूयांसि तु समाम्नानात्। व्यंजनमात्रं तु तत् तस्याभि धानस्य भवति। यथा ब्राह्मणाय बुभुक्षिताय ओदनं देहि, स्नाताय अनुलेपनं, पिपासते पानीयम् इति।।[12]
निरुक्तानुसारं सूर्यदेवता द्युस्थानीयो देवता। आचार्ययास्कः कथयति यत् आदित्यदेवस्य असौ लोकः अर्थात् द्युलोकः तृतीयसवनम्, वर्षाऋतुः, जगतीछन्दः, सप्तदशस्तोम एवं वैरूपंसाम तथा च शिशिरऋतुः, अतिछन्दः त्रयस्त्रिंशत्स्तोम एवं रैवतसामादिद्युलोकभागिनः सन्ति।[13]
आदित्यदेवस्य कर्म रसादानम् अर्थात् रसस्य आकर्षणम्, रश्मिभिश्च रसधारणम् अर्थात् किरणैः रसधारणम् ग्रहणम् तथा च यंच किंचत् प्रवह्लितम् अर्थात् वनस्पत्यौषधीनां वृद्धिः एवं पुष्टिः तत् सर्वम् आदित्यकर्म वर्तते। आदित्यस्य मन्त्र ऋग्वेदे प्राप्यते। यथा–

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानमभ्श्रीः।
इतो जातोविष्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण।[14]

इतो जातः सर्वमिदमिभिविपश्यति। वैश्वानरः संयतते सूर्येण। राजा यः सर्वेषां भूतानामभिश्रयणीयः तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्यामिति।।
ऋग्वेदे अनुसारं देवानाम् अनीकम् चित्रम् मित्रस्य वरुणस्य अग्नेः चक्षुः सूर्यः उदगात्। द्यावापृथिवी अन्तरिक्षम् आ अप्रा। जगतः तस्थुषः च आत्मा। यथा–

चित्रं देवानामुदगदनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च।।[15]

अथ आदित्यात् उदीचि प्रथम समावृते आदित्ये कंसं वा मणि वा परिमृज्य प्रतिस्वर यत्र शुष्कगोमयम् असंस्पर्शयन् धारयति तत् प्रदीप्यते। सः अयमेव सम्पद्यते अथापि आह वैश्वानरो यतते सूर्येण इति।।[16]
ऐतरेयब्राह्मणस्य[17] कथनमस्ति यत् ''अग्निः सर्वाः देवताः'' अर्थात् अग्नि एव सर्वेषु देवेषु मुख्यो वर्तते। अथवा अग्नेः कथनेन एव अन्येषां ग्रहणं भवति। ऋग्वेदस्य एका ऋचा अस्य ब्राह्मणवचनस्य अधिकं समर्थनार्थं प्रमाणरूपेण दत्ता वर्तते। यथा–

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिष्वानमाहुः।।[18]

यत् अग्निरेव इन्द्रं मित्रं वरुणमादिनामभिः ज्ञायते। तथा अग्निरेव दिव्यदिविज अर्थात् द्युलोकवासी, सुपर्ण अर्थात् पतनशीलः, गरुत्मान् अर्थात् स्तुतियुक्त अथवा रसान् यः आकर्षयति स आदित्य अपि प्रसिद्धाग्निरेवाऽस्ति। अयमेकमग्निमेव मेधावी तथा आत्मज्ञानी जनाः अनेकैः नामभिः आह्वयन्ति। यथा यम तथा मातरिश्वादि देवाः।
पश्चात् कथितं वर्तते यत् निस्सन्देहेन अनेकानां नामानि अग्निः वर्तते। यथा– विद्युत, आदित्यादि अपि अग्नि अस्ति, किन्तु गौणरूपेण। गौणीवृत्या एते अग्निनाम्ना व्यवहृताः सन्ति। किन्तु वास्तवरूपेण एषः पार्थिवाग्निरेव अग्निरस्ति।
अथ असौ आदित्यः– इति पूर्वे याज्ञिकाः। एषा लोकानां रोहेण, सवनानां रोहः आग्नातः। रोहात्प्रत्यवरोहः चिकीर्षितः ताम् अनुकृति होता अग्निमारुते शस्त्रे, वैश्वानरीयेण सूक्तेन[19] तथा वर्षाकर्मणा वैश्वानरस्य स्तुतिः कृता वर्तते, अत एषः मध्यमाग्नि अर्थात् विद्युत् अस्ति तदपि उचित नास्ति। कारणं अस्मिन पार्थिवाग्नौ एव सर्वम् उपपद्यते। अग्रिमे मन्त्रे वर्णितमस्ति। यथा–

समानमेतदुदकमुच्चैत्यव चाहभिः।
भूमि पर्जन्या जिन्वन्ति दिव जिन्वन्त्यग्नयः।[20]

समानम्– एकमेवेदम्, उदकम्–उदकत्वेनाविशिष्टम् उच्चैत्यवचाहभिः। उत् एति च ऊद्घ्वं चैति। अहोभिर्निमित्तभूतैः पुनश्च अहोभिरेव अवाम् एति नीचैरागच्छति। भूमिं पर्जन्या माध्यमिका देवगणा जिन्वन्ति–तर्ण्यन्ति, ओषधयुत्पत्तये एवं तावदवाम् एति। यथैवामुतो वर्षेणेमां पर्जन्या जिन्वन्ति तथैवाहुति प्रभावेण वर्षेण दिवं जिन्वन्त्यग्नयः आहुतयो हयग्नौ प्रक्षिप्ताः पुनर्वर्षं प्रकल्पयन्ति।
आग्नेयेषु एव हि सूक्तेषु वैश्वानरीयाः प्रवादाः भवन्ति अग्निकर्मणा च एनं स्तौति। इति दहसि, इति वहसि, इति पचसि इति यथो एतत्–वर्षकर्मणा हि एनं स्तौति ''इति अस्मिन् अपि एतत् उपपद्यते।[21]
सर्वे देवाः अग्नौ एव सन्निहिताः सन्ति। द्युलोके यः अग्नि अस्ति सः सौराग्निरस्ति। अन्तरिक्षलोके य अग्निरस्ति सः विद्युताग्नि अस्ति। वृक्षेस्थित अग्निः दावाग्निः वर्तते, जलेस्थित अग्निः वडवानलाग्निरूपेण व्यवह्रियते तथा शरीरेस्थित अग्निः जठराग्निरूपेण ज्ञायते। अतः वक्तुं यत् ''अग्निरेव सर्वाः देवताः।''

**सन्दर्भ**


1. निरुक्त, 7.2.1
2. निरुक्त, 7.2.1
3. निरुक्त, 7.2.2
4. निरुक्त, 7.3.1
5. निरुक्त, 7.4.1
6. ऋग्वेद, 1.1.1
7. निरुक्त, 7.3.10
8. ऋग्वेदः, 4.58.8
9. ऋग्वेद, 2.12.1
10. निरुक्त, 7.3.11
11. मैत्रायणी संहिता, 2.2.10, 11
12. निरुक्त, 7.3.13
13. निरुक्त, 7.3.11,
14. ऋग्वेदः, 1.98.1, निरुक्त 7.6.21
15. ऋग्वेदः, 1.115.1–6
16. निरुक्त, 7.6, ऋग्वेदः, 1.98.1
17. ऐतरेयब्राह्मण, 2.3
18. ऋग्वेदः, 1.164.46
19. निरुक्त, 7.6
20. ऋग्वेदः, 1.164.51
21. निरुक्त, 7.6,